Hence some of the following names for an eminent physician: धन्वन्तरिः *m.*, अश्विनीकुमारः, अश्विनीपुत्रः, राजवैद्यः, शतमारी *m.* (न्).

PHYSICKED, *p. p.* चिकित्सितः -ता -तं, कृतोपचारः -रा -रं.

PHYSICS, *s. pl.* साकारपदार्थविज्ञानं, स्थूलपदार्थविज्ञानं, साकारपदार्थविद्या, साकारपदार्थशास्त्रं, पदार्थविज्ञानं, सिद्धपदार्थविज्ञानं.

PHYSIOGNOMIST, *s.* मुखलक्षणज्ञः, मुखलक्षणविद् *m.*, मुखसामुद्रिकः.

PHYSIOGNOMY, *s.* (Art of discerning the character from the features) मुखलक्षणनिरूपणविद्या, मुखलक्षणनिरूपणात् स्वभावपरिच्छेदः. —(Countenance) मुखं, वदनं, आननं, आस्यं, वक्त्रं.

PHYSIOLOGIC, PHYSIOLOGICAL, *a.* प्राणिधर्म्मगुणविद्यासम्बन्धी &c., प्राणिधर्म्मगुणविद्याविषयकः -का -कं.

PHYSIOLOGIST, *s.* प्राणिधर्म्मगुणविद्याज्ञः, प्राणिधर्म्मगुणवेत्ता *m.* (तृ).

PHYSIOLOGY, *s.* प्राणिधर्म्मगुणविद्या, प्राणिधर्म्मगुणज्ञानं, प्राणिधर्म्मगुणशास्त्रं, जन्तुगुणधर्म्मविद्या, द्रव्यतत्त्वज्ञानं.

PIACULAR, PIACULOUS, *a.* प्रायश्चित्तकारी-रिणी-रि(न्), अघनाशक -का-कं.

PIA-MATER, *s.* मस्तिष्कावरणत्वक् *f.* (च्), मस्तिष्कावरणं.

PIANO, *s.* (In music) मन्दं.—(A kind of instrument) तन्त्रीकवाद्यविशेषः.

PIAZZA, *s.* स्तम्भपंक्तिप्रान्तितो मण्डपपथः or मण्डपस्य छन्नपथः.

PICAROON, *s.* समुद्रयायी दस्युविशेषः or अपहारकविशेषः.

*To* PICK, *v. a.* (Gather by plucking) अङ्गुलिभिर् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or आदा (c. 3. -ददाति -दत्ते -दातुं) or चि (c. 5. चिनोति, चेतुं) or अवचि or लू or छिद्; 'he picks a branch from the tree,' वृक्षपल्लवम् आदत्ते.—(Clean with the teeth or claws) दन्तैः or नखैः or अङ्गुलिभिः शुध् or मृज् or परिष्कृ.—(Pick a bone) अस्थिमांसम् दन्तैर् उत्कृष् (c. 1. -कर्षति -क्रष्टुं) or निष्कृष् or चर्व् (c. 1. चर्वति -र्वितुं), अस्थिपरिष्कारं कृ, अस्थिशोधनं कृ.—(Cull, select) उद्धृ (c. 1. -हरति -हर्त्तुं), समुद्धृ, उद्ग्रह् वृ, उद्धृ, चूर्णिं कृ.—(Separate with the fingers) अङ्गुलिभिः पृथक् or खण्डीकृ.—(Pick off) प्रत्येकं or एकैकशो हृ or उद्धृ, पृथक् पृथग् उद्धृ.—(Pick out, select) उद्धृ, समुद्धृ.—(Pick out, pluck out) उत्पट् (c. 10. -पाटयति -यितुं), उल्लुच् (c. 1. -लुञ्चति -ञ्चितुं). उद्धृ, समुद्धृ, उत्कृष्, उल्लुञ्चनं कृ.—(Pick up) उद्धृ, समुद्धृ, आदा, ग्रह्, उद्ग्रह्, प्रतिग्रह्, उत्था in caus. (-थापयति-यितुं, rt. स्था), समुत्था.—(Pick the ear) कर्णशोधनं कृ, कर्णनिर्घर्षणं कृ.—(Pick the nose) नासाशोधनं कृ, नासानिर्घर्षणं कृ.—(Pick the teeth) दन्तशोधनं कृ, दन्तनिर्घर्षणं कृ.—(Pick the pocket) कोषस्थद्रव्यं छलेन अपहृ or हृ, कोषं छित्त्वा तत्रस्थद्रव्यम् अपहृ.—(Pick holes) छिद्रान्वेषणं कृ.

*To* PICK, *v. n.* (Eat by morsels) अल्पाल्पशः or अल्पखण्डशः खाद्.

PICK, *s.* (Axe) पाषाणदारणः. *See* the next.—(Choice) उद्धारः, उद्धरणं, उद्धरणाधिकारः, वरणाधिकारः, विकल्पः -ल्पकः.

PICK-AXE, *s.* पाषाणदारणः, पाषाणभेदनी, टङ्कः, शैलभित्तिः *f.*, शिलाकुट्टकः, खनित्रं.

PICKED, *p. p.* उद्धृतः -ता -तं, उद्गृहीतः &c., हृतः &c., परिगणितः &c.

PICEKT *s.* सेनायाः पुरतः स्थापितं रक्षकदलं, सज्जनं, उपरक्षणं, सेनारक्षः.—(Stake) शङ्कुः *m.*, शल्यं.

PICKING, *s.* (Plucking, selecting) ग्रहणं, अङ्गुलिभिर् ग्रहणं, उद्ग्रहणं उद्धारः, उद्धरणं.—(Stealing) अपहारः, अपहरणं, क्षुद्रद्रव्यहरणं.—(Extra gain) अधिकलाभः, अधिकप्राप्तिः *f.*, अवान्तरलाभः.

PICKLE *s.* (Vegetable, &c., pickled) सन्धितं, सन्धानं, लवणशाकः, सन्धितशाकः, लवणितशाकः.—(Brine) लवणोदं, लवणं.—(State of difficulty) दुर्दशा, दुर्गतिः *f.*, दुरवस्था.

*To* PICKLE, *v. a.* सन्धा (c. 3. -दधाति -धातुं), सन्धितं -तां कृ, लवणाकृ, लवण (nom. लवणयति -यितुं), लवणीकृ, उपस्कृ.

PICKLED, *p.p.* सन्धितः -ता -तं, लवणितः -ता -तं, लवणीकृतः &c., उपस्कृतः &c.

PICK-POCKET, *s.* कोषच्छेदकः, कोषस्थद्रव्यापहारकः, ग्रन्थिच्छेदकः, चिल्लाभः.

PIC-NIC, *s.* वनभोजनं, अरण्यभोजनं, गणभोजनं.

PICTORIAL, *a.* (Pertaining to pictures) चित्रसम्बन्धी &c., चित्रलेखासम्बन्धी &c.—(Illustrated by pictures) सचित्रः -त्रा -त्रं, चित्रयुक्तः -क्ता -क्तं, चित्रलिखितः -ता -तं.

PICTURE, *s.* चित्रं, चित्रलेखा, चित्रलिखितं, आलेख्यं, प्रतिमा -मानं, चित्रफलकः, प्रतिकृतिः *f.*, प्रतिरूपं, प्रतिच्छाया, प्रतिच्छन्दकं, प्रतिबिम्बं, बिम्बः -म्बं, कर्करीकः, प्रतिनिधिः *m.*, प्रतियातना; 'represented in a picture,' आलिखितः -ता -तं; 'immoveable as in a picture,' आलिखित इव निश्चलः.

*To* PICTURE, *v. a.* (Paint a resemblance) चित्र (c. 10. चित्रयति -यितुं), आलिख् (c. 6. -लिखति -लेखितुं), लिख्, चित्रं लिख्, वर्ण् (c. 10. वर्णयति -यितुं), बिम्ब (nom. बिम्बयति -यितुं), प्रतिबिम्ब, प्रतिमानं कृ, आलेख्यं कृ.—(Figure to one's self mentally) मनसा क्लृप् or संक्लृप् or भू (c. 10. भावयति -यितुं) or विभू.

PICTURED, *p. p.* or *a.* चित्रगतः -ता -तं, चित्रसंस्थः -स्था -स्थं, आलिखितः -ता -तं, चित्रलिखितः &c., आलेख्यसमर्पितः &c., चित्रसमर्पितः &c., बिम्बितः &c., प्रतिबिम्बितः &c., बिम्बागतः &c.—(In the mind) मनसा कल्पितः -ता -तं.

PICTURE-FRAME, *s.* चित्रावरणकाष्ठं, चित्रपरिगतकाष्ठं, चित्रावरणं.

PICTURE-GALLERY, *s.* चित्रशाला, चित्ररक्षणशाला, आलेख्यशाला.

PICTURE-MAKER, *s.* चित्रकरः, चित्रकारः, चित्रकृत् *m.*, चित्रकर्म्मा *m.* (न्).

PICTURESQUE, *s.* (Like a picture) चित्रसदृशः -शी -शं, चित्रोपमः -मा -मं, चित्रलेखातुल्यः -ल्या -ल्यं.—(Diversified with hill, dale, wood, &c.) जाङ्गलः -ली -लं, जङ्गलः -ला -लं, पर्व्वतवननदीमिश्रितः &c., पर्व्वतनदीवनादिमिश्रितः &c.

*To* PIDDLE, *v. n.* (Deal in trifles). *See To* PEDDLE.—(Make water, as a child) बालकवद् मूत्रं कृ or मूत्रोत्सर्गं कृ, मूत्र् (c. 10. मूत्रयति -यितुं).

PIE, *s.* शष्कुली; 'number of pies,' शाष्कुलिकं.

PIEBALD, *a.* नानावर्णः -र्णा -र्णं, नानारङ्गः -ङ्गा -ङ्गं, शबलः -ला -लं, कर्बुरः -रा -रं, चित्राङ्गः -ङ्गी -ङ्गं, चित्रविचित्रः -त्रा -त्रं; 'piebald horse,' हलाहः -हा, हालाहः -हा.

PIECE, *s*, (Fragment, part separated from the whole) खण्डः -ण्डं -ण्डकः, लवः, अंशः, भागः, शकलः -लं, भिन्नं, भित्तं, भित्तिः *f.*, दलं, विदलं; 'in pieces,' खण्डशस्, खण्डं खण्डं, लवशस्, भागशस्; 'to break in pieces,' खण्डशः कृ, खण्डं खण्डं कृ, लवशः कृ, विदलीकृ, शकलीकृ, लवशः खण्ड् (c. 10. खण्डयति -यितुं); 'in many pieces,' बहुखण्डशः कृ, बहुलवशः कृ; 'in a hundred pieces,' शतखण्डशः कृ; 'to fall to pieces,' विदल् (c. 1. -दलति -लितुं), विदलीभू; 'broken in a hundred pieces,' शतचूर्णः -र्णा -र्णं.—(Part of any thing) भागः, अंशः, विभागः, खण्डः -ण्डकः, अङ्गं; 'piece of wood,' काष्ठखण्डः; 'piece of cloth,' वस्त्रखण्डः.—(Separate composition or performance) रचना, प्रबन्धः, बन्धः or expressed by the word itself; as, 'a piece of poetry,' काव्यरचना, काव्यबन्धः, काव्यप्रबन्धः, कविता; 'piece of work,' कर्म्म *n.* (न्), कर्म्मप्रबन्धः.—(Piece of money) मुद्रा; 'gold piece,